अथाप्यत्रापि।

"यावत् प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तममध्यमान्त्यम्।
त्रिंशत्तदर्द्धांशगुणोत्तरेण
निदेशजानां धरणीपतीनाम्॥"

गर्गस्तु।

"यदन्यद्विविधं द्वन्द्वं प्रोच्यते धरणीभुजाम्।
ताभ्यामेवातिरिच्येत मल्लद्वन्द्वं विशेषतः॥
अन्येषु दैवात् भिन्नेषु मल्लद्वन्द्वात् जयेन्नृपः।
मल्लद्वन्द्वे हि भिन्ने हि न चान्यत् कार्य्यकारकम्॥"

भोजस्तु।

"यदेव वैरिदुर्लङ्घ्यं विस्तीर्णं विषमञ्च तत्।
सप्रवेशापसरणं तद्द्वन्द्वमुत्तमं विदुः॥"

इति भोजराजकृतयुक्तिकल्पतरुः॥

द्वन्द्वः, पुं, (द्वौ द्वौ सहाभिव्यक्तौ इति। निपातनात् साधुः। चार्थे द्वन्द्व इति निर्द्देशात् पुंस्त्वम्।) रोगविशेषः। समासभेदः। इति शब्दरत्नावली॥ स तु भिन्नार्थानां पदानां समासः। वोपदेवेनास्य चसंज्ञा कृता। स इतरेतरयोगसमाहारभेदेन द्विधा भवति। इतरेतरद्वन्द्वो यथा। हरिश्च हरश्च हरिहरौ। अत्र प्रत्येकपदप्राधान्यात् द्वित्वं बहुत्वं शेषशब्दलिङ्गभाजित्वञ्च भवति। समाहारद्वन्द्वो यथा। वाक् च त्वक् च इयोः समाहारः वाक्त्वचम्। अत्र संहतेरेकत्वादेकवचनं नित्यक्लीवलिङ्गत्वञ्च भवति। इति मुग्धबोधम्॥ (यदुक्तं,— [भावः॥")

"द्वन्द्वो द्विगुरपि चाहं मद्गृहे नित्यमव्ययी-

द्वन्द्वचरः, पुं, (द्वन्द्वेन चरतीति। चर+अच्।) चक्रवाकः। इति हेमचन्द्रः। ४। ३६६॥ (यथा, रघुः। १६। ६३।

आवर्त्तशोभा नतनाभिकान्ते-
र्भङ्गो भ्रुवां द्वन्द्वचराः स्तनानाम्।
जातानि रूपावयवोपमाना-
न्यदूरवर्त्तीनि विलासिनीनाम्॥")

द्वन्द्वचारी, [न्] पुं, (द्वन्द्वेन चरतीति। चर+णिनिः।) चक्रवाकः। इति त्रिकाण्डशेषः॥

द्वन्द्वजः, पुं, (द्वन्द्वात् जायते इति। जन+डः।) द्विदोषजरोगः। इति निदानम्॥ कलहाज्जाते, त्रि॥

द्वयं, क्ली, (द्वौ अवयवौ यस्य। द्वि+"संख्याया अवयवे तयप्।" ५। २। ४२। इति तयप्। "द्वित्रिभ्यान्तयस्यायज्वा।" ५। २। ४३। इति तयस्यायच्।) द्व्यात्मकम्। दुइ इति भाषा। तत्पर्य्यायः। उभौ २ द्वौ ३ युगलम् ४ द्वितयम् ५ युगम् ६ द्वैतम् ७ यमम् ८ द्वन्द्वम् ९ युग्मम् १० यमलम् ११ यामलम् १२। इति हेमचन्द्रः। ६। ५६॥

द्वयाग्निः, पुं, (द्वयो द्विरूपोऽग्निर्यत्र।) वृक्षभेदः। रक्तचिता इति भाषा। तत्पर्य्यायः। पाटी २ हस्ताग्निः ३। इति शब्दचन्द्रिका॥

द्वयातिगः, त्रि, (द्वयं अतिगच्छति अतिक्रामतीति। अति+गम+डः।) रजस्तमोगुणशून्यः। सत्त्वगुणयुक्तः। इत्यमरः।२। ७।४५॥

द्वाः, [र्] स्त्री, (द्वारयतीति। द्वृ वरणे+णिच्+बाहुलकात् क्विप्।) द्वारम्। इत्यमरः। २।२। १३॥ (यथा, भागवते। ३। ५। १।

"द्वारि द्युनद्या ऋषभः कुरूणां
मैत्रेयमासीनमगाधबोधम्॥")

उपायः। यथा, ज्ञानद्वारा भवेन्मुक्तिरिति ज्ञानशास्त्रम्॥

द्वाःस्थः, पुं, (द्वारि तिष्ठतीति। स्था+कः।) द्वारपालः। इति शब्दरत्नावली॥ (यथा, भागवते। १। १८। ३४।

"ब्राह्मणैः क्षत्त्रबन्धुर्हि द्वारपालो निरूपितः।
स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हति॥")

नन्दिकेश्वरः। इति भूरिप्रयोगः॥

द्वाःस्थितः, त्रि, (द्वारि स्थितः।) द्वारपालः। इत्यमरकोषशब्दरत्नावल्यौ॥

द्वाःस्थितदर्शकः, त्रि, (द्वाःस्थितः सन् पश्यतीति। दृश्+ण्वुल्।) द्वारपालः। इत्यमरटीकायां भरतः॥

द्वाःस्थितदर्शी, [न्] त्रि, (द्वारि स्थितः सन् पश्यतीति। दृश्+णिनिः।) द्वारपालः। इति भरतधृतरभसः रमानाथश्च॥

द्वाचत्वारिंशत्, स्त्री, (द्व्यधिका चत्वारिंशत्। द्विशब्दस्य वा आत्वम्।) द्विचत्वारिंशत्। इति व्याकरणम्॥ ४२ बेयाल्लिश इति भाषा॥

द्वात्रिंशत्, स्त्री, (द्व्यधिका त्रिंशत्। "द्व्यष्टनः संख्यायामिति।" ६।३।४७। इति आत्वम्।) द्व्यधिकत्रिंशत् संख्या। तत्संख्येयाश्च। ३२ बत्रिश इति भाषा। यथा, द्वात्रिंशत्प्रसवे नार्य्याश्चतुस्त्रिंशद्गमे नृणामित्यादि ज्योतिस्तत्त्वम्॥

द्वात्रिंशदक्षरी, [न्] पुं, (द्वात्रिंशदक्षराणि सन्ति अत्र। बाहुलकात् इनिः।) ग्रन्थः। इति त्रिकाण्डशेषः॥

द्वात्रिंशल्लक्षणोपेतः, पुं, (द्वात्रिंशल्लक्षणैरुपेतः।) महापुरुषः। इति शब्दार्थकल्पतरुः॥ तल्लक्षणानि यथा,—

"रागः सप्तसु हन्त षट्स्वपि शिशोरङ्गेष्वलं तुङ्गता
विस्तारस्त्रिषु खर्व्वता त्रिषु तथा गम्भीरता च त्रिषु।
दैर्घ्यं पञ्चसु किञ्च पञ्चसु सखे! संप्रेक्ष्यते सूक्ष्मता
द्वात्रिंशद्वरलक्षणः कथमसौ गोपेषु सम्भाव्यते॥"

इति श्रीहरिभक्तिरसामृतसिन्धुः॥

"राग इति। श्रीमद्व्रजेश्वरं प्रति कस्यचित् सवयसो गोपस्य वाक्यमिदम्। सप्तसु नेत्रान्तपादकरतलताल्वधरौष्ठजिह्वानखेषु षट्सु वक्षःस्कन्धनखनासिकाकटिमुखेषु। त्रिषु कटिललाटवक्षःसु। केचित् कटिस्थाने शिरः पठन्ति। पुनस्त्रिषु ग्रीवाजङ्घामेहनेषु। पुनस्त्रिषु नाभिस्वरसत्त्वेषु। पञ्चसु नासाभुजनेत्रहनूजानुषु। पुनः पञ्चसु त्वक्केशरोमदन्ताङ्गुलिपर्व्वसु। तथैव महापुरुषलक्षणे सामुद्रकग्रन्थप्रसिद्धेः। द्वात्रिंशदराणि तत्तल्लक्षणेभ्यः अन्येभ्योऽपि श्रेष्ठानि लक्षणानि यस्य सः गोपेषु कथमिति भगवदवतारादिषु अप्येताहशलक्षणादिति भावः।" इति श्रीजीवगोस्वामिविरचिता दुर्गमसङ्गमनीनाम्नी टीका॥

द्वादश, [न्] त्रि, (द्व्यधिका दश। "द्व्यष्टन इति।" ६।३।४७। इति आत्वम्।) द्व्यधिका दश। १२ बार इति भाषा। द्वादशसंख्या तत्संख्येयाश्च। अयं नित्यबहुवचनान्तः। त्रिलिङ्गे समानरूपः। इति व्याकरणम्॥ द्वादशवाचकानि यथा। सूर्य्यः १ मासः २ राशिः ३ संक्रान्तिः ४ गुहबाहुः ५ सारिकोष्ठः ६ गुहनेत्रम् ७ राजमण्डलम् ८। इति कविकल्पलता॥

द्वादशः, त्रि, (द्वादशानां पूरणः। "तस्य पूरणे डट्।"५।२।४८। इति डट्।) द्वादशानां पूरणः। इति व्याकरणम्॥ बारइ इति भाषा। (यथा, मनुः।

"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥"

महादेवः। यथा, महाभारते। १३।१७।६३।

"द्वादशस्त्राशनश्चाद्यो यज्ञो यज्ञसमाहितः॥")

द्वादशकरः, पुं, (द्वादश करा भुजा यस्य।) बृहस्पतिः। इति त्रिकाण्डशेषः॥ कार्त्तिकेयश्च॥

द्वादशपत्रकं, क्ली, (द्वादश अक्षराणि पत्राणि इव यस्य।) योगविशेषः। यथा,—

"पितामहोऽपि तं पुत्त्रं साध्यं सद्विनये रतम्।
सनत्कुमारं प्रोवाच योगं द्वादशपत्रकम्॥
शिखासंस्थस्तु ॐकारं मेषोऽस्य शिरसि स्थितः।
मासो वैशाखनामा च प्रथमं पत्रकं स्मृतम्॥
नकारः शिरसि प्रोक्तो वृषोऽस्य शिरसि स्थितः।
ज्यैष्ठमासस्य तत् पत्रं द्वितीयं परिकीर्त्तितम्॥
मोकारो भुजयोर्युग्मं मिथुनं तत्र संस्थितम्
मास आषाढ़नामा च तृतीयं पत्रकं स्मृतम्॥
भकारो नेत्रयुगलं कर्कटस्तत्र संस्थितः।
मासः श्रावण इत्युक्तश्चतुर्थं पत्रकं स्मृतम्॥
गकारो हृदयं प्रोक्तं सिंहो वसति तत्र च।
मासो भाद्रस्तथा प्रोक्तः पञ्चमं पत्रकं स्मृतम्।
वकारं कवचं विद्यात् कन्या तत्र प्रतिष्ठिता।
मासश्चाश्वयुजो नाम षष्ठं तत्पत्रकं स्मृतम्॥
तेकारमस्त्रग्रामञ्च तुलाराशिकृताश्रयः।
मासश्च कार्त्तिको नाम सप्तमं पत्रकं स्मृतम्॥
वाकारो नाभिसंयुक्तः स्थितस्तत्र च वृश्चिकः।
मासो मार्गशिरो नाम त्वष्टकं पत्रकं स्मृतम्॥
सुकारो जघनः प्रोक्तस्तत्रस्थश्च धनुर्धरः।
पुष्येति गदितो मासो नवमं परिकीर्त्तितम्॥
देकारश्चोरुयुगलं मकरोऽप्यत्र संस्थितः।
माघो निगदितो मासः पत्रकं दशमं स्मृतम्॥
वाकारो जानुयुगलं कुम्भस्तत्रापि संस्थितः।